नृसिंह–कवचम् वक्ष्ये प्रह्लादेनोदितम् पुरा ।
सर्वरक्ष–करम् पुण्यम् सर्वोपद्रव–नाशनम् ॥

सर्वसंपत्करम् चैव स्वर्ग–मोक्ष–प्रदायकम् ।
ध्यात्वा नृसिंहम् देवेशम् हेम–सिंहासन–स्थितम् ॥

विवृतास्यम् त्रिनयनम् शरदेंदु समप्रभम् ।
लक्ष्म्यालिंगित–वामांगम् विभूतिभिर्–उपाश्रितम् ॥

चतुर्भुजम् कोमलांगम् स्वर्णकुंडल शोभितम् ।
सरोज शोभितोरस्कम् रत्नकेयूर मुद्रितम् ॥

तप्तकांचनसंकाशम् पीत निर्मल वाससम् ।
इंद्रादिसुरमौलिस्थह स्फुरन् माणिक्य–दीप्तिभिहि ॥

विराजित पादद्वंद्वम् शंखचक्रादि हेतिभिः ।
गरुत्मता च विनयात् स्तूयमानम् मुदान्वितम् ॥

स्वह्रित् कमलसम्वासम् क्रित्वा तु कवचम् पथेत् ।
ओम् नृसिंहो मे शिरपातु लोकरक्षार्थ–सम्भवाः ॥

सर्वगोपि स्तम्भवासः फलम् मे रक्षतु ध्वनिम् ।
नृसिंहो मे द्रिशौ पातु सोम सूर्याग्नि लोचनः ॥

स्मितम् मॆ पातु नृहरिः मुनिवर्यस्तुतिप्रियः ।
नासम् मे सिंहनाशस्तु मुखम् लक्ष्मीमुखप्रियः ॥

सर्वविद्याधिपः पातु नृसिंहॊरसनम् मम ।
वक्त्रम् पात्वेंदु वदनम् सदा प्रह्लाद वंदितः ॥

नृसिंहः पातु मॆ कंथम् स्कंधौ भूभ्रिदनंतक्रित् ।
दिव्यास्त्रशॊभितभुजो नृसिम्हः पातु मे भुजौ ॥

करौ मॆ दॆव–वरदॊ नृसिम्हः पातु सर्वतः ।
हृदयम् यॊगिसाध्यश्च निवासम् पातु मॆ हरिः ॥

मध्यम् पातु हिरण्याक्ष वक्षह्कुक्षिविदारणः ।
नाभिम् मॆ पातु नृहरिः स्वनाभिब्रह्मसंस्तुतः ॥

ब्रह्मांडकॊतयः कत्याम् यस्यासौ पातु मॆ कतिम् ।
गुह्यम् मॆ पातु गुह्यानाम् मंत्रानाम् गुह्यरूपद्रिक् ॥

ऊरू मनोभवः पातु जानुनी नररूपद्रिक् ।
जंघॆ पातु धराभर हर्ता योसौ नृकॆशरी ॥

सुरराज्यप्रदः पातु पादौ मॆ नृहरीश्वरः ।
सहस्रशीर्शा पुरुशः पातु मॆ सर्वशस्तनुम् ॥

महोग्रः पूर्वतः पातु महाविराग्रजोग्नितः ।
महाविष्णुर्दक्षिणेतु महाज्वलस्तु नैरृतः ॥

पश्चिमे पातु सर्वेशो दिशि मे सर्वतो मुखः ।
नृसिंह पातु वायव्याम् सौम्याम् भूशनविग्रह ॥

ईशान्यम् पातु भध्रो मे सर्वमंगलदायकः ।
सम्सारभयतः पातु मृत्योर् मृत्युर् नृकेसरी ॥

इदम् नृसिंहकवचम् प्रह्लादमुखमंदितम् ।
भक्तिमान् यः पथेन् नित्यम् सर्वपापैहि प्रमुच्यते ॥

पुत्रवान् धनवान् लोके दीर्घायुरुपजायते ।
यम् यम् कामयते कामम् तम् तम् प्राप्नोत्यसंशयम् ॥

सर्वत्र जयम् आप्नोति सर्वत्र विजयी भवेत् ।
भूम्यंतरीक्ष दिव्यानाम् ग्रहानाम् विनिवारनम् ॥

वृश्चिकोरग सम्भूत विश्यापहरणम् परम् ।
ब्रह्मराक्शस यक्षानाम् दूरोत्सारनकारनम् ॥

भूर्जे वा तालपत्रे वा कवचम् लिखितम् शुभम् ।
करमूले धृतम् येन सिध्येयुः कर्मसिद्धयः ॥

देवासुर मनुष्येशु स्वम् स्वम् ऐव जयम् लभेत् ।
ऐक संध्यम् त्रिसंध्यम् वा यः पथेन् नियतो नरः ॥

सर्वमंगल मांगल्यम् भुक्तिम् मुक्तिम् च विंदति ।
द्वात्रिंशति सहस्राणि पथेत् शुद्धात्मनाम् नृनाम् ॥

कवचस्यास्य मंत्रस्य मंत्रसिद्धिः प्रजायते ।
अनेन मंत्रराजेन कृत्वा भस्माभिमंत्रणम् ॥

तिलकम् विन्यसेद् यस्तु तस्य ग्रहभयम् हरेत् ।
त्रिवारम् जपमानस्तु दत्तम् वार्याभिमंत्र्यच ॥

प्रशयेद् यो नरो मंत्रम् नृसिंहध्यानम् आचरेत् ।
तस्य रोगाः प्रणष्यंति येचस्युः कुक्षिसम्भवाः ॥

गर्जंतम् गार्जयंतम् निजभुजपतलम् स्फोतयंतम् हतंतम् ।
रूप्यंतम् तापयंतम् दिविभुवि दितिजम् क्षेपयंतम् क्षिपंतम् ।

क्रंदंतम् रोषयंतम् दिशिदिशि सततम् संहरंतम् भरंतम् ।
वीक्षंतम् पूर्णयंतम् करनिकरशतैर्दिव्यसिंहम् नमामि ॥